# Patanjali Yogasutra with and without Vedic Accents

# પાતઞ્જલયોગસૂત્રાણિ સસ્વર

## Document Information

Text title : yogasuutra by maharShii pata.njali with and without Vedic Accents

File name : yogasuutra.itx

Category : sUtra, yoga

Location : doc_yoga

Transliterated by : Accents by BS

Proofread by : Sunder Hattangadi and Kirk Wortman, BS

Description-comments : Accents from Yoga_Sutra_Full.pdf notes by Paul Harvey

Latest update : July 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 15, 2024

*sanskritdocuments.org*

# પાતઞ્જલયોગસૂત્રાણિ સસ્વર

॥ મહર્ષિ પતઞ્જલિ પ્રણીતં યોગદર્શનમ્ ॥

## ॥ પ્રથમોઽધ્યાયઃ ॥ ॥ સમાધિ-પાદઃ ॥

અથ યોગાનુશાસનમ્ ॥ ૧.૧॥

યોગશ્ચિત્તવૃત્તિનિરોધઃ ॥ ૧.૨॥

તદા દ્રષ્ટુઃ સ્વરૂપેઽવસ્થાનમ્ ॥ ૧.૩॥

વૃત્તિસારૂપ્યમિતરત્ર ॥ ૧.૪॥

વૃત્તયઃ પઞ્ચતય્યઃ ક્લિષ્ટાઽક્લિષ્ટાઃ ॥ ૧.૫॥

પ્રમાણવિપર્યયવિકલ્પનિદ્રાસ્મૃતયઃ ॥ ૧.૬॥

પ્રત્યક્ષાનુમાનાગમાઃ પ્રમાણાનિ ॥ ૧.૭॥

વિપર્યયો મિથ્યાજ્ઞાનમતદ્રૂપપ્રતિષ્ઠમ્ ॥ ૧.૮॥

શબ્દજ્ઞાનાનુપાતી વસ્તુશૂન્યો વિકલ્પઃ ॥ ૧.૯॥

અભાવપ્રત્યયાલમ્બના વૃત્તિર્નિદ્રા ॥ ૧.૧૦॥

અનુભૂતવિષયાસમ્પ્રમોષઃ સ્મૃતિઃ ॥ ૧.૧૧॥

અભ્યાસવૈરાગ્યાભ્યાં તન્નિરોધઃ ॥ ૧.૧૨॥

તત્ર સ્થિતૌ યત્નોઽભ્યાસઃ ॥ ૧.૧૩॥

સ તુ દીર્ઘકાલનૈરન્તર્યસત્કારાસેવિતો દૃઢભૂમિઃ ॥ ૧.૧૪॥

દૃષ્ટાનુશ્રવિકવિષયવિતૃષ્ણસ્ય વશીકારસંજ્ઞા વૈરાગ્યમ્ ॥ ૧.૧૫॥

તત્પરં પુરુષખ્યાતેર્ગુણવૈતૃષ્ણ્યમ્ ॥ ૧.૧૬॥

વિતર્કવિચારાનન્દાસ્મિતારૂપાનુગમાત્ સમ્પ્રજ્ઞાતઃ ॥ ૧.૧૭॥ (સ્મિતાસ્વરૂપાનુગમાત્, સ્મિતાનુગમાત્)

વિરામપ્રત્યયાભ્યાસપૂર્વઃ સંસ્કારશેષોઽન્યઃ ॥ ૧.૧૮॥

ભવપ્રત્યયો વિદેહપ્રકૃતિલયાનામ્ ॥ ૧.૧૯॥

શ્રદ્ધાવીર્યસ્મૃતિસમાધિપ્રજ્ઞાપૂર્વક ઇતરેષામ્ ॥ ૧.૨૦॥

તીવ્રસંવેગાનામાસન્નઃ ॥ ૧.૨૧॥

મૃદુમધ્યાધિમાત્રત્વાત્ તતોઽપિ વિશેષઃ ॥ ૧.૨૨॥

ઈશ્વરપ્રણિધાનાદ્વા ॥ ૧.૨૩॥

ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ ઈશ્વરઃ ॥ ૧.૨૪॥

તત્ર નિરતિશયં સર્વજ્ઞબીજમ્ ॥ ૧.૨૫॥ (સર્વજ્ઞત્વબીજમ્)

સ પૂર્વેષામપિ ગુરુઃ કાલેનાનવચ્છેદાત્ ॥ ૧.૨૬॥

તસ્ય વાચકઃ પ્રણવઃ ॥ ૧.૨૭॥

તજ્જપસ્તદર્થભાવનમ્ ॥ ૧.૨૮॥

તતઃ પ્રત્યક્ચેતનાધિગમોઽપ્યન્તરાયાભાવશ્ચ ॥ ૧.૨૯॥

વ્યાધિસ્ત્યાનસંશયપ્રમાદાલસ્યાવિરતિ-
ભ્રાન્તિદર્શનાલબ્ધભૂમિકત્વાનવસ્થિતત્વાનિ
ચિત્તવિક્ષેપાસ્તેઽન્તરાયાઃ ॥ ૧.૩૦॥

દુઃખદૌર્મનસ્યાઙ્ગમેજયત્વશ્વાસપ્રશ્વાસા વિક્ષેપસહભુવઃ ॥ ૧.૩૧॥

તત્પ્રતિષેધાર્થમેકતત્ત્વાભ્યાસઃ ॥ ૧.૩૨॥

મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાણાં
ભાવનાતશ્ચિત્તપ્રસાદનમ્ ॥ ૧.૩૩॥

પ્રચ્છર્દનવિધારણાભ્યાં વા પ્રાણસ્ય ॥ ૧.૩૪॥

વિષયવતી વા પ્રવૃત્તિરુત્પન્ના મનસઃ સ્થિતિનિબન્ધિની ॥ ૧.૩૫॥

વિશોકા વા જ્યોતિષ્મતી ॥ ૧.૩૬॥

વીતરાગવિષયં વા ચિત્તમ્ ॥ ૧.૩૭॥

સ્વપ્નનિદ્રાજ્ઞાનાલમ્બનં વા ॥ ૧.૩૮॥

યથાભિમતધ્યાનાદ્વા ॥ ૧.૩૯॥

પરમાણુ પરમમહત્ત્વાન્તોઽસ્ય વશીકારઃ ॥ ૧.૪૦॥

ક્ષીણવૃત્તેરભિજાતસ્યેવ મણેર્ગ્રહીતૃગ્રહણગ્રાહ્યેષુ
તત્સ્થતદઞ્જનતા સમાપત્તિઃ ॥ ૧.૪૧॥

તત્ર શબ્દાર્થજ્ઞાનવિકલ્પૈઃ સઙ્કીર્ણા સવિતર્કા સમાપત્તિઃ ॥ ૧.૪૨॥

સ્મૃતિપરિશુદ્ધૌ સ્વરૂપશૂન્યેવાર્થમાત્રનિર્ભાસા નિર્વિતર્કા ॥ ૧.૪૩॥

એતયૈવ સવિચારા નિર્વિચારા ચ સૂક્ષ્મવિષયા વ્યાખ્યાતા ॥ ૧.૪૪॥

સૂક્ષ્મવિષયત્વં ચાલિઙ્ગપર્યવસાનમ્ ॥ ૧.૪૫॥

તા એવ સબીજઃ સમાધિઃ ॥ ૧.૪૬॥

નિર્વિચારવૈશારદ્યેઽધ્યાત્મપ્રસાદઃ ॥ ૧.૪૭॥

ઋતમ્ભરા તત્ર પ્રજ્ઞા ॥ ૧.૪૮॥

શ્રુતાનુમાનપ્રજ્ઞાભ્યામન્યવિષયા વિશેષાર્થત્વાત્ ॥ ૧.૪૯॥

તજ્જઃ સંસ્કારોઽન્યસંસ્કારપ્રતિબન્ધી ॥ ૧.૫૦॥

તસ્યાપિ નિરોધે સર્વનિરોધાન્નિર્બીજઃ સમાધિઃ ॥ ૧.૫૧॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે પ્રથમઃ સમાધિ-પાદઃ ॥

## ॥ દ્વિતીયોઽધ્યાયઃ ॥ ॥ સાધન-પાદઃ ॥

તપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ ક્રિયાયોગઃ ॥ ૨.૧॥

સમાધિભાવનાર્થઃ ક્લેશતનૂકરણાર્થશ્ચ ॥ ૨.૨॥

અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશાઃ ક્લેશાઃ ॥ ૨.૩॥

અવિદ્યા ક્ષેત્રમુત્તરેષાં પ્રસુપ્તતનુવિચ્છિન્નોદારાણામ્ ॥ ૨.૪॥

અનિત્યાશુચિદુઃખાનાત્મસુ નિત્યશુચિસુખાત્મખ્યાતિરવિદ્યા ॥ ૨.૫॥

દૃગ્દર્શનશક્ત્યોરેકાત્મતેવાસ્મિતા ॥ ૨.૬॥

સુખાનુશયી રાગઃ ॥ ૨.૭॥

દુઃખાનુશયી દ્વેષઃ ॥ ૨.૮॥

સ્વરસવાહી વિદુષોઽપિ તથારૂઢોઽભિનિવેશઃ ॥ ૨.૯॥

તે પ્રતિપ્રસવહેયાઃ સૂક્ષ્માઃ ॥ ૨.૧૦॥

ધ્યાનહેયાસ્તદ્વૃત્તયઃ ॥ ૨.૧૧॥

ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટજન્મવેદનીયઃ ॥ ૨.૧૨॥

સતિ મૂલે તદ્વિપાકો જાત્યાયુર્ભોગાઃ ॥ ૨.૧૩॥

તે હ્લાદપરિતાપફલાઃ પુણ્યાપુણ્યહેતુત્વાત્ ॥ ૨.૧૪॥

પરિણામતાપસંસ્કારદુઃખૈર્ગુણવૃત્તિવિરોધાચ્ચ
દુઃખમેવ સર્વં વિવેકિનઃ ॥ ૨.૧૫॥

હેયં દુઃખમનાગતમ્ ॥ ૨.૧૬॥

દ્રષ્ટૃદૃશ્યયોઃ સંયોગો હેયહેતુઃ ॥ ૨.૧૭॥

પ્રકાશક્રિયાસ્થિતિશીલં ભૂતેન્દ્રિયાત્મકં
ભોગાપવર્ગાર્થં દૃશ્યમ્ ॥ ૨.૧૮॥

વિશેષાવિશેષલિઙ્ગમાત્રાલિઙ્ગાનિ ગુણપર્વાણિ ॥ ૨.૧૯॥

દ્રષ્ટા દૃશિમાત્રઃ શુદ્ધોઽપિ પ્રત્યયાનુપશ્યઃ ॥ ૨.૨૦॥

તદર્થ એવ દૃશ્યસ્યાત્મા ॥ ૨.૨૧॥

કૃતાર્થં પ્રતિ નષ્ટમપ્યનષ્ટં તદન્યસાધારણત્વાત્ ॥ ૨.૨૨॥

સ્વસ્વામિશક્ત્યોઃ સ્વરૂપોપલબ્ધિહેતુઃ સંયોગઃ ॥ ૨.૨૩॥

તસ્ય હેતુરવિદ્યા ॥ ૨.૨૪॥

તદભાવાત્ સંયોગાભાવો હાનં તદ્દૃશેઃ કૈવલ્યમ્ ॥ ૨.૨૫॥

વિવેકખ્યાતિરવિપ્લવા હાનોપાયઃ ॥ ૨.૨૬॥

તસ્ય સપ્તધા પ્રાન્તભૂમિઃ પ્રજ્ઞા ॥ ૨.૨૭॥

યોગાઙ્ગાનુષ્ઠાનાદશુદ્ધિક્ષયે જ્ઞાનદીપ્તિરા વિવેકખ્યાતેઃ ॥ ૨.૨૮॥

યમનિયમાસનપ્રાણાયામપ્રત્યાહારધારણાધ્યાનસમાધયોઽષ્ટાવઙ્ગાનિ ॥ ૨.૨૯॥

અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ ॥ ૨.૩૦॥

જાતિદેશકાલસમયાનવચ્છિન્નાઃ સાર્વભૌમા મહાવ્રતમ્ ॥ ૨.૩૧॥

શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ ॥ ૨.૩૨॥

વિતર્કબાધને પ્રતિપક્ષભાવનમ્ ॥ ૨.૩૩॥

વિતર્કા હિંસાદયઃ કૃતકારિતાનુમોદિતા લોભક્રોધમોહપૂર્વકા
મૃદુમધ્યાધિમાત્રા દુઃખાજ્ઞાનાનન્તફલા ઇતિ પ્રતિપક્ષભાવનમ્ ॥ ૨.૩૪॥

અહિંસાપ્રતિષ્ઠાયાં તત્સન્નિધૌ વૈરત્યાગઃ ॥ ૨.૩૫॥

સત્યપ્રતિષ્ઠાયાં ક્રિયાફલાશ્રયત્વમ્ ॥ ૨.૩૬॥

અસ્તેયપ્રતિષ્ઠાયાં સર્વરત્નોપસ્થાનમ્ ॥ ૨.૩૭॥

બ્રહ્મચર્યપ્રતિષ્ઠાયાં વીર્યલાભઃ ॥ ૨.૩૮॥

અપરિગ્રહસ્થૈર્યે જન્મકથન્તાસમ્બોધઃ ॥ ૨.૩૯॥

શૌચાત્ સ્વાઙ્ગજુગુપ્સા પરૈરસંસર્ગઃ ॥ ૨.૪૦॥

સત્ત્વશુદ્ધિસૌમનસ્યૈકાગ્ર્યેન્દ્રિયજયાત્મદર્શનયોગ્યત્વાનિ ચ ॥ ૨.૪૧॥

સન્તોષાદનુત્તમસુખલાભઃ ॥ ૨.૪૨॥

કાયેન્દ્રિયસિદ્ધિરશુદ્ધિક્ષયાત્ તપસઃ ॥ ૨.૪૩॥

સ્વાધ્યાયાદ્ ઇષ્ટદેવતાસમ્પ્રયોગઃ ॥ ૨.૪૪॥

સમાધિસિદ્ધિરીશ્વરપ્રણિધાનાત્ ॥ ૨.૪૫॥

સ્થિરસુખમ્ આસનમ્ ॥ ૨.૪૬॥

પ્રયત્નશૈથિલ્યાનન્તસમાપત્તિભ્યામ્ ॥ ૨.૪૭॥

તતો દ્વન્દ્વાનભિઘાતઃ ॥ ૨.૪૮॥

તસ્મિન્સતિ શ્વાસપ્રશ્વાસયોર્ગતિવિચ્છેદઃ પ્રાણાયામઃ ॥ ૨.૪૯॥

બાહ્યાભ્યન્તરસ્તમ્ભવૃત્તિર્દેશકાલસઙ્ખ્યાભિઃ
પરિદૃષ્ટો દીર્ઘસૂક્ષ્મઃ ॥ ૨.૫૦॥

બાહ્યાભ્યન્તરવિષયાક્ષેપી ચતુર્થઃ ॥ ૨.૫૧॥

તતઃ ક્ષીયતે પ્રકાશાવરણમ્ ॥ ૨.૫૨॥

ધારણાસુ ચ યોગ્યતા મનસઃ ॥ ૨.૫૩॥

સ્વવિષયાસમ્પ્રયોગે ચિત્તસ્વરૂપાનુકાર ઇવેન્દ્રિયાણાં પ્રત્યાહારઃ ॥ ૨.૫૪॥

તતઃ પરમા વશ્યતેન્દ્રિયાણામ્ ॥ ૨.૫૫॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે દ્વિતીયઃ સાધન-પાદઃ ॥

## ॥ તૃતીયોઽધ્યાયઃ ॥ ॥ વિભૂતિ-પાદઃ ॥

દેશબન્ધશ્ચિત્તસ્ય ધારણા ॥ ૩.૧॥

તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્ ॥ ૩.૨॥

તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ ॥ ૩.૩॥

ત્રયમેકત્ર સંયમઃ ॥ ૩.૪॥

તજ્જયાત્પ્રજ્ઞાલોકઃ ॥ ૩.૫॥

તસ્ય ભૂમિષુ વિનિયોગઃ ॥ ૩.૬॥

ત્રયમન્તરઙ્ગં પૂર્વેભ્યઃ ॥ ૩.૭॥

તદપિ બહિરઙ્ગં નિર્બીજસ્ય ॥ ૩.૮॥

વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવૌ
નિરોધક્ષણચિત્તાન્વયો નિરોધપરિણામઃ ॥ ૩.૯॥

તસ્ય પ્રશાન્તવાહિતા સંસ્કારાત્ ॥ ૩.૧૦॥

સર્વાર્થતૈકાગ્રતયોઃ ક્ષયોદયૌ ચિત્તસ્ય સમાધિપરિણામઃ ॥ ૩.૧૧॥

તતઃ પુનઃ શાન્તોદિતૌ તુલ્યપ્રત્યયૌ ચિત્તસ્યૈકાગ્રતાપરિણામઃ ॥ ૩.૧૨॥

એતેન ભૂતેન્દ્રિયેષુ ધર્મલક્ષણાવસ્થાપરિણામા વ્યાખ્યાતાઃ ॥ ૩.૧૩॥

શાન્તોદિતાવ્યપદેશ્યધર્માનુપાતી ધર્મી ॥ ૩.૧૪॥

ક્રમાન્યત્વં પરિણામાન્યત્વે હેતુઃ ॥ ૩.૧૫॥

પરિણામત્રયસંયમાદ્ અતીતાનાગતજ્ઞાનમ્ ॥ ૩.૧૬॥

શબ્દાર્થપ્રત્યયાનામિતરેતરાધ્યાસાત્

સઙ્કરસ્તત્પ્રવિભાગસંયમાત્સર્વભૂતરુતજ્ઞાનમ્ ॥ ૩.૧૭॥

સંસ્કારસાક્ષાત્કરણાત્પૂર્વજાતિજ્ઞાનમ્ ॥ ૩.૧૮॥

પ્રત્યયસ્ય પરચિત્તજ્ઞાનમ્ ॥ ૩.૧૯॥

ન ચ તત્સાલમ્બનં તસ્યાવિષયીભૂતત્વાત્ ॥ ૩.૨૦॥

કાયરૂપસંયમાત્તદ્ગ્રાહ્યશક્તિસ્તમ્ભે
ચક્ષુઃપ્રકાશાસમ્પ્રયોગેઽન્તર્ધાનમ્ ॥ ૩.૨૧॥

સોપક્રમં નિરુપક્રમં ચ કર્મ
તત્સંયમાદપરાન્તજ્ઞાનમરિષ્ટેભ્યો વા ॥ ૩.૨૨॥

મૈત્ર્યાદિષુ બલાનિ ॥ ૩.૨૩॥

બલેષુ હસ્તિબલાદીનિ ॥ ૩.૨૪॥

પ્રવૃત્ત્યાલોકન્યાસાત્સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટજ્ઞાનમ્ ॥ ૩.૨૫॥

ભુવનજ્ઞાનં સૂર્યે સંયમાત્ ॥ ૩.૨૬॥

ચન્દ્રે તારાવ્યૂહજ્ઞાનમ્ ॥ ૩.૨૭॥

ધ્રુવે તદ્ગતિજ્ઞાનમ્ ॥ ૩.૨૮॥

નાભિચક્રે કાયવ્યૂહજ્ઞાનમ્ ॥ ૩.૨૯॥

કણ્ઠકૂપે ક્ષુત્પિપાસાનિવૃત્તિઃ ॥ ૩.૩૦॥

કૂર્મનાડ્યાં સ્થૈર્યમ્ ॥ ૩.૩૧॥

મૂર્ધજ્યોતિષિ સિદ્ધદર્શનમ્ ॥ ૩.૩૨॥

પ્રાતિભાદ્વા સર્વમ્ ॥ ૩.૩૩॥

હૃદયે ચિત્તસંવિત્ ॥ ૩.૩૪॥

સત્ત્વપુરુષયોરત્યન્તાસઙ્કીર્ણયોઃ પ્રત્યયાવિશેષો ભોગઃ
પરાર્થત્વાત્સ્વાર્થસંયમાત્પુરુષજ્ઞાનમ્ ॥ ૩.૩૫॥

તતઃ પ્રાતિભશ્રાવણવેદનાદર્શાસ્વાદવાર્તા જાયન્તે ॥ ૩.૩૬॥

તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ ॥ ૩.૩૭॥

બન્ધકારણશૈથિલ્યાત્પ્રચારસંવેદનાચ્ચ

ચિત્તસ્ય પરશરીરાવેશઃ ॥ ૩.૩૮॥

ઉદાનજયાજ્જલપઙ્કકણ્ટકાદિષ્વસઙ્ગ ઉત્ક્રાન્તિશ્ચ ॥ ૩.૩૯॥

સમાનજયાજ્જ્વલનમ્ ॥ ૩.૪૦॥ (સમાનજયાત્પ્રજ્વલનમ્)

શ્રોત્રાકાશયોઃ સમ્બન્ધસંયમાદ્દિવ્યં શ્રોત્રમ્ ॥ ૩.૪૧॥

કાયાકાશયોઃ સમ્બન્ધસંયમાલ્લઘુતૂલ-
સમાપત્તેશ્ચાકાશગમનમ્ ॥ ૩.૪૨॥

બહિરકલ્પિતા વૃત્તિર્મહાવિદેહા તતઃ પ્રકાશાવરણક્ષયઃ ॥ ૩.૪૩॥

સ્થૂલસ્વરૂપસૂક્ષ્માન્વયાર્થવત્ત્વસંયમાદ્ભૂતજયઃ ॥ ૩.૪૪॥

તતોઽણિમાદિપ્રાદુર્ભાવઃ કાયસમ્પત્તદ્ધર્માનભિઘાતશ્ચ ॥ ૩.૪૫॥

રૂપલાવણ્યબલવજ્રસંહનનત્વાનિ કાયસમ્પત્ ॥ ૩.૪૬॥

ગ્રહણસ્વરૂપાસ્મિતાન્વયાર્થવત્ત્વસંયમાદિન્દ્રિયજયઃ ॥ ૩.૪૭॥

તતો મનોજવિત્વં વિકરણભાવઃ પ્રધાનજયશ્ચ ॥ ૩.૪૮॥

સત્ત્વપુરુષાન્યતાખ્યાતિમાત્રસ્ય સર્વભાવાધિષ્ઠાતૃત્વં
સર્વજ્ઞાતૃત્વં ચ ॥ ૩.૪૯॥

તદ્વૈરાગ્યાદપિ દોષબીજક્ષયે કૈવલ્યમ્ ॥ ૩.૫૦॥

સ્થાન્યુપનિમન્ત્રણે સઙ્ગસ્મયાકરણં પુનરનિષ્ટપ્રસઙ્ગાત્ ॥ ૩.૫૧॥

ક્ષણતત્ક્રમયોઃ સંયમાદ્વિવેકજં જ્ઞાનમ્ ॥ ૩.૫૨॥

જાતિલક્ષણદેશૈરન્યતાનવચ્છેદાત્ તુલ્યયોસ્તતઃ પ્રતિપત્તિઃ ॥ ૩.૫૩॥

તારકં સર્વવિષયં સર્વથાવિષયમક્રમઞ્ચેતિ વિવેકજં જ્ઞાનમ્ ॥ ૩.૫૪॥

સત્ત્વપુરુષયોઃ શુદ્ધિસામ્યે કૈવલ્યમિતિ ॥ ૩.૫૫॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે તૃતીયો વિભૂતિ-પાદઃ ॥

## ॥ ચતુર્થોઽધ્યાયઃ ॥ ॥ કૈવલ્ય-પાદઃ ॥

જન્મૌષધિમન્ત્રતપઃસમાધિજાઃ સિદ્ધયઃ ॥ ૪.૧॥

જાત્યન્તરપરિણામઃ પ્રકૃત્યાપૂરાત્ ॥ ૪.૨॥

નિમિત્તમપ્રયોજકં પ્રકૃતીનાં વરણભેદસ્તુ
તતઃ ક્ષેત્રિકવત્ ॥ ૪.૩॥

નિર્માણચિત્તાન્યસ્મિતામાત્રાત્ ॥ ૪.૪॥

પ્રવૃત્તિભેદે પ્રયોજકં ચિત્તમેકમનેકેષામ્ ॥ ૪.૫॥

તત્ર ધ્યાનજમનાશયમ્ ॥ ૪.૬॥

કર્માશુક્લાકૃષ્ણં યોગિનસ્ત્રિવિધમિતરેષામ્ ॥ ૪.૭॥

તતસ્તદ્વિપાકાનુગુણાનામેવાભિવ્યક્તિર્વાસનાનામ્ ॥ ૪.૮॥

જાતિદેશકાલવ્યવહિતાનામપ્યાનન્તર્યં
સ્મૃતિસંસ્કારયોરેકરૂપત્વાત્ ॥ ૪.૯॥

તાસામનાદિત્વં ચાશિષો નિત્યત્વાત્ ॥ ૪.૧૦॥

હેતુફલાશ્રયાલમ્બનૈઃ સઙ્ગૃહીતત્વાદેષામભાવે તદભાવઃ ॥ ૪.૧૧॥

અતીતાનાગતં સ્વરૂપતોઽસ્ત્યધ્વભેદાદ્ધર્માણામ્ ॥ ૪.૧૨॥

તે વ્યક્તસૂક્ષ્મા ગુણાત્માનઃ ॥ ૪.૧૩॥

પરિણામૈકત્વાદ્વસ્તુતત્ત્વમ્ ॥ ૪.૧૪॥

વસ્તુસામ્યે ચિત્તભેદાત્તયોર્વિભક્તઃ પન્થાઃ ॥ ૪.૧૫॥

ન ચૈકચિત્તતન્ત્રં વસ્તુ તદપ્રમાણકં તદા કિં સ્યાત્ ॥ ૪.૧૬॥

તદુપરાગાપેક્ષિત્વાચ્ચિત્તસ્ય વસ્તુ જ્ઞાતાજ્ઞાતમ્ ॥ ૪.૧૭॥

સદા જ્ઞાતાશ્ચિત્તવૃત્તયસ્તત્પ્રભોઃ પુરુષસ્યાપરિણામિત્વાત્ ॥ ૪.૧૮॥

ન તત્સ્વાભાસં દૃશ્યત્વાત્ ॥ ૪.૧૯॥

એકસમયે ચોભયાનવધારણમ્ ॥ ૪.૨૦॥

ચિત્તાન્તરદૃશ્યે બુદ્ધિબુદ્ધેરતિપ્રસઙ્ગઃ સ્મૃતિસઙ્કરશ્ચ ॥ ૪.૨૧॥

ચિતેરપ્રતિસઙ્ક્રમાયાસ્તદાકારાપત્તૌ સ્વબુદ્ધિસંવેદનમ્ ॥ ૪.૨૨॥

દ્રષ્ટૃદૃશ્યોપરક્તં ચિત્તં સર્વાર્થમ્ ॥ ૪.૨૩॥

તદસઙ્ખ્યેયવાસનાભિશ્ચિત્રમપિ પરાર્થં સંહત્યકારિત્વાત્ ॥ ૪.૨૪॥

વિશેષદર્શિન આત્મભાવભાવનાવિનિવૃત્તિઃ ॥ ૪.૨૫॥

તદા વિવેકનિમ્નં કૈવલ્યપ્રાગ્ભારં ચિત્તમ્ ॥ ૪.૨૬॥

તચ્છિદ્રેષુ પ્રત્યયાન્તરાણિ સંસ્કારેભ્યઃ ॥ ૪.૨૭॥

હાનમેષાં ક્લેશવદુક્તમ્ ॥ ૪.૨૮॥

પ્રસઙ્ખ્યાનેઽપ્યકુસીદસ્ય સર્વથા
વિવેકખ્યાતેર્ધર્મમેઘઃ સમાધિઃ ॥ ૪.૨૯॥

તતઃ ક્લેશકર્મનિવૃત્તિઃ ॥ ૪.૩૦॥

તદા સર્વાવરણમલાપેતસ્ય જ્ઞાનસ્યાનન્ત્યાજ્જ્ઞેયમલ્પમ્ ॥ ૪.૩૧॥

તતઃ કૃતાર્થાનાં પરિણામક્રમસમાપ્તિર્ગુણાનામ્ ॥ ૪.૩૨॥

ક્ષણપ્રતિયોગી પરિણામાપરાન્તનિર્ગ્રાહ્યઃ ક્રમઃ ॥ ૪.૩૩॥

પુરુષાર્થશૂન્યાનાં ગુણાનાં પ્રતિપ્રસવઃ કૈવલ્યં
સ્વરૂપપ્રતિષ્ઠા વા ચિતિશક્તિરિતિ ॥ ૪.૩૪॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે ચતુર્થઃ કૈવલ્ય-પાદઃ ॥

॥ ઇતિ શ્રી પાતઞ્જલ-યોગ-સૂત્રાણિ ॥

# પાતઞ્જલયોગસૂત્રાણિ સસ્વર

## નિઃસ્વર

॥ મહર્ષિ પતઞ્જલિ પ્રણીતં યોગદર્શનમ્ ॥

## ॥ પ્રથમોઽધ્યાયઃ ॥  ॥ સમાધિ-પાદઃ ॥

અથ યોગાનુશાસનમ્ ॥ ૧.૧॥

યોગશ્ચિત્તવૃત્તિનિરોધઃ ॥ ૧.૨॥

તદા દ્રષ્ટુઃ સ્વરૂપેઽવસ્થાનમ્ ॥ ૧.૩॥

વૃત્તિસારૂપ્યમિતરત્ર ॥ ૧.૪॥

વૃત્તયઃ પઞ્ચતય્યઃ ક્લિષ્ટાઽક્લિષ્ટાઃ ॥ ૧.૫॥

પ્રમાણવિપર્યયવિકલ્પનિદ્રાસ્મૃતયઃ ॥ ૧.૬॥

પ્રત્યક્ષાનુમાનાગમાઃ પ્રમાણાનિ ॥ ૧.૭॥

વિપર્યયો મિથ્યાજ્ઞાનમતદ્રૂપપ્રતિષ્ઠમ્ ॥ ૧.૮॥

શબ્દજ્ઞાનાનુપાતી વસ્તુશૂન્યો વિકલ્પઃ ॥ ૧.૯॥

અભાવપ્રત્યયાલમ્બના વૃત્તિર્નિદ્રા ॥ ૧.૧૦॥

અનુભૂતવિષયાસમ્પ્રમોષઃ સ્મૃતિઃ ॥ ૧.૧૧॥

અભ્યાસવૈરાગ્યાભ્યાં તન્નિરોધઃ ॥ ૧.૧૨॥

તત્ર સ્થિતૌ યત્નોઽભ્યાસઃ ॥ ૧.૧૩॥

સ તુ દીર્ઘકાલનૈરન્તર્યસત્કારાસેવિતો દૃઢભૂમિઃ ॥ ૧.૧૪॥

દૃષ્ટાનુશ્રવિકવિષયવિતૃષ્ણસ્ય વશીકારસંજ્ઞા વૈરાગ્યમ્ ॥ ૧.૧૫॥

તત્પરં પુરુષખ્યાતેર્ગુણવૈતૃષ્ણ્યમ્ ॥ ૧.૧૬॥

વિતર્કવિચારાનન્દાસ્મિતારૂપાનુગમાત્ સમ્પ્રજ્ઞાતઃ ॥ ૧.૧૭॥ (સ્મિતાસ્વરૂપાનુગમાત્, સ્મિતાનુગમાત્)

વિરામપ્રત્યયાભ્યાસપૂર્વઃ સંસ્કારશેષોઽન્યઃ ॥ ૧.૧૮॥

ભવપ્રત્યયો વિદેહપ્રકૃતિલયાનામ્ ॥ ૧.૧૯॥

શ્રદ્ધાવીર્યસ્મૃતિસમાધિપ્રજ્ઞાપૂર્વક ઇતરેષામ્ ॥ ૧.૨૦॥

તીવ્રસંવેગાનામાસન્નઃ ॥ ૧.૨૧॥

મૃદુમધ્યાધિમાત્રત્વાત્ તતોઽપિ વિશેષઃ ॥ ૧.૨૨॥

ઈશ્વરપ્રણિધાનાદ્વા ॥ ૧.૨૩॥

ક્લેશકર્મવિપાકાશયૈરપરામૃષ્ટઃ પુરુષવિશેષ ઈશ્વરઃ ॥ ૧.૨૪॥

તત્ર નિરતિશયં સર્વજ્ઞબીજમ્ ॥ ૧.૨૫॥ (સર્વજ્ઞત્વબીજમ્)

સ પૂર્વેષામપિ ગુરુઃ કાલેનાનવચ્છેદાત્ ॥ ૧.૨૬॥

તસ્ય વાચકઃ પ્રણવઃ ॥ ૧.૨૭॥

તજ્જપસ્તદર્થભાવનમ્ ॥ ૧.૨૮॥

તતઃ પ્રત્યક્ચેતનાધિગમોઽપ્યન્તરાયાભાવશ્ચ ॥ ૧.૨૯॥

વ્યાધિસ્ત્યાનસંશયપ્રમાદાલસ્યાવિરતિ-
ભ્રાન્તિદર્શનાલબ્ધભૂમિકત્વાનવસ્થિતત્વાનિ
ચિત્તવિક્ષેપાસ્તેઽન્તરાયાઃ ॥ ૧.૩૦॥

દુઃખદૌર્મનસ્યાઙ્ગમેજયત્વશ્વાસપ્રશ્વાસા વિક્ષેપસહભુવઃ ॥ ૧.૩૧॥

તત્પ્રતિષેધાર્થમેકતત્ત્વાભ્યાસઃ ॥ ૧.૩૨॥

મૈત્રીકરુણામુદિતોપેક્ષાણાં સુખદુઃખપુણ્યાપુણ્યવિષયાણાં
ભાવનાતશ્ચિત્તપ્રસાદનમ્ ॥ ૧.૩૩॥

પ્રચ્છર્દનવિધારણાભ્યાં વા પ્રાણસ્ય ॥ ૧.૩૪॥

વિષયવતી વા પ્રવૃત્તિરુત્પન્ના મનસઃ સ્થિતિનિબન્ધિની ॥ ૧.૩૫॥

વિશોકા વા જ્યોતિષ્મતી ॥ ૧.૩૬॥

વીતરાગવિષયં વા ચિત્તમ્ ॥ ૧.૩૭॥

સ્વપ્નનિદ્રાજ્ઞાનાલમ્બનં વા ॥ ૧.૩૮॥

યથાભિમતધ્યાનાદ્વા ॥ ૧.૩૯॥

પરમાણુ પરમમહત્ત્વાન્તોઽસ્ય વશીકારઃ ॥ ૧.૪૦॥

ક્ષીણવૃત્તેરભિજાતસ્યેવ મણેર્ગ્રહીતૃગ્રહણગ્રાહ્યેષુ
તત્સ્થતદઞ્જનતા સમાપત્તિઃ ॥ ૧.૪૧॥

તત્ર શબ્દાર્થજ્ઞાનવિકલ્પૈઃ સઙ્કીર્ણા સવિતર્કા સમાપત્તિઃ ॥ ૧.૪૨॥

સ્મૃતિપરિશુદ્ધૌ સ્વરૂપશૂન્યેવાર્થમાત્રનિર્ભાસા નિર્વિતર્કા ॥ ૧.૪૩॥

એતયૈવ સવિચારા નિર્વિચારા ચ સૂક્ષ્મવિષયા વ્યાખ્યાતા ॥ ૧.૪૪॥

સૂક્ષ્મવિષયત્વં ચાલિઙ્ગપર્યવસાનમ્ ॥ ૧.૪૫॥

તા એવ સબીજઃ સમાધિઃ ॥ ૧.૪૬॥

નિર્વિચારવૈશારદ્યેઽધ્યાત્મપ્રસાદઃ ॥ ૧.૪૭॥

ઋતમ્ભરા તત્ર પ્રજ્ઞા ॥ ૧.૪૮॥

શ્રુતાનુમાનપ્રજ્ઞાભ્યામન્યવિષયા વિશેષાર્થત્વાત્ ॥ ૧.૪૯॥

તજ્જઃ સંસ્કારોઽન્યસંસ્કારપ્રતિબન્ધી ॥ ૧.૫૦॥

તસ્યાપિ નિરોધે સર્વનિરોધાન્નિર્બીજઃ સમાધિઃ ॥ ૧.૫૧॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે પ્રથમઃ સમાધિ-પાદઃ ॥

## ॥ દ્વિતીયોઽધ્યાયઃ ॥ ॥ સાધન-પાદઃ ॥

તપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ ક્રિયાયોગઃ ॥ ૨.૧॥

સમાધિભાવનાર્થઃ ક્લેશતનૂકરણાર્થશ્ચ ॥ ૨.૨॥

અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશાઃ ક્લેશાઃ ॥ ૨.૩॥

અવિદ્યા ક્ષેત્રમુત્તરેષાં પ્રસુપ્તતનુવિચ્છિન્નોદારાણામ્ ॥ ૨.૪॥

અનિત્યાશુચિદુઃખાનાત્મસુ નિત્યશુચિસુખાત્મખ્યાતિરવિદ્યા ॥ ૨.૫॥

દૃગ્દર્શનશક્ત્યોરેકાત્મતેવાસ્મિતા ॥ ૨.૬॥

સુખાનુશયી રાગઃ ॥ ૨.૭॥

દુઃખાનુશયી દ્વેષઃ ॥ ૨.૮॥

સ્વરસવાહી વિદુષોઽપિ તથારૂઢોઽભિનિવેશઃ ॥ ૨.૯॥

તે પ્રતિપ્રસવહેયાઃ સૂક્ષ્માઃ ॥ ૨.૧૦॥

ધ્યાનહેયાસ્તદ્વૃત્તયઃ ॥ ૨.૧૧॥

ક્લેશમૂલઃ કર્માશયો દૃષ્ટાદૃષ્ટજન્મવેદનીયઃ ॥ ૨.૧૨॥

સતિ મૂલે તદ્વિપાકો જાત્યાયુર્ભોગાઃ ॥ ૨.૧૩॥

તે હ્લાદપરિતાપફલાઃ પુણ્યાપુણ્યહેતુત્વાત્ ॥ ૨.૧૪॥

પરિણામતાપસંસ્કારદુઃખૈર્ગુણવૃત્તિવિરોધાચ્ચ
દુઃખમેવ સર્વં વિવેકિનઃ ॥ ૨.૧૫॥

હેયં દુઃખમનાગતમ્ ॥ ૨.૧૬॥

દ્રષ્ટૃદૃશ્યયોઃ સંયોગો હેયહેતુઃ ॥ ૨.૧૭॥

પ્રકાશક્રિયાસ્થિતિશીલં ભૂતેન્દ્રિયાત્મકં
ભોગાપવર્ગાર્થં દૃશ્યમ્ ॥ ૨.૧૮॥

વિશેષાવિશેષલિઙ્ગમાત્રાલિઙ્ગાનિ ગુણપર્વાણિ ॥ ૨.૧૯॥

દ્રષ્ટા દૃશિમાત્રઃ શુદ્ધોઽપિ પ્રત્યયાનુપશ્યઃ ॥ ૨.૨૦॥

તદર્થ એવ દૃશ્યસ્યાત્મા ॥ ૨.૨૧॥

કૃતાર્થં પ્રતિ નષ્ટમપ્યનષ્ટં તદન્યસાધારણત્વાત્ ॥ ૨.૨૨॥

સ્વસ્વામિશક્ત્યોઃ સ્વરૂપોપલબ્ધિહેતુઃ સંયોગઃ ॥ ૨.૨૩॥

તસ્ય હેતુરવિદ્યા ॥ ૨.૨૪॥

તદભાવાત્ સંયોગાભાવો હાનં તદ્દૃશેઃ કૈવલ્યમ્ ॥ ૨.૨૫॥

વિવેકખ્યાતિરવિપ્લવા હાનોપાયઃ ॥ ૨.૨૬॥

તસ્ય સપ્તધા પ્રાન્તભૂમિઃ પ્રજ્ઞા ॥ ૨.૨૭॥

યોગાઙ્ગાનુષ્ઠાનાદશુદ્ધિક્ષયે જ્ઞાનદીપ્તિરા વિવેકખ્યાતેઃ ॥ ૨.૨૮॥

યમનિયમાસનપ્રાણાયામપ્રત્યાહારધારણાધ્યાનસમાધયોઽષ્ટાવઙ્ગાનિ ॥ ૨.૨૯॥

અહિંસાસત્યાસ્તેયબ્રહ્મચર્યાપરિગ્રહા યમાઃ ॥ ૨.૩૦॥

જાતિદેશકાલસમયાનવચ્છિન્નાઃ સાર્વભૌમા મહાવ્રતમ્ ॥ ૨.૩૧॥

શૌચસન્તોષતપઃસ્વાધ્યાયેશ્વરપ્રણિધાનાનિ નિયમાઃ ॥ ૨.૩૨॥

વિતર્કબાધને પ્રતિપક્ષભાવનમ્ ॥ ૨.૩૩॥

વિતર્કા હિંસાદયઃ કૃતકારિતાનુમોદિતા લોભક્રોધમોહપૂર્વકા
મૃદુમધ્યાધિમાત્રા દુઃખાજ્ઞાનાનન્તફલા ઇતિ પ્રતિપક્ષભાવનમ્ ॥ ૨.૩૪॥

અહિંસાપ્રતિષ્ઠાયાં તત્સન્નિધૌ વૈરત્યાગઃ ॥ ૨.૩૫॥

સત્યપ્રતિષ્ઠાયાં ક્રિયાફલાશ્રયત્વમ્ ॥ ૨.૩૬॥

અસ્તેયપ્રતિષ્ઠાયાં સર્વરત્નોપસ્થાનમ્ ॥ ૨.૩૭॥

બ્રહ્મચર્યપ્રતિષ્ઠાયાં વીર્યલાભઃ ॥ ૨.૩૮॥

અપરિગ્રહસ્થૈર્યે જન્મકથન્તાસમ્બોધઃ ॥ ૨.૩૯॥

શૌચાત્ સ્વાઙ્ગજુગુપ્સા પરૈરસંસર્ગઃ ॥ ૨.૪૦॥

સત્ત્વશુદ્ધિસૌમનસ્યૈકાગ્ર્યેન્દ્રિયજયાત્મદર્શનયોગ્યત્વાનિ ચ ॥ ૨.૪૧॥

સન્તોષાદનુત્તમસુખલાભઃ ॥ ૨.૪૨॥

કાયેન્દ્રિયસિદ્ધિરશુદ્ધિક્ષયાત્ તપસઃ ॥ ૨.૪૩॥

સ્વાધ્યાયાદ્ ઇષ્ટદેવતાસમ્પ્રયોગઃ ॥ ૨.૪૪॥

સમાધિસિદ્ધિરીશ્વરપ્રણિધાનાત્ ॥ ૨.૪૫॥

સ્થિરસુખમ્ આસનમ્ ॥ ૨.૪૬॥

પ્રયત્નશૈથિલ્યાનન્તસમાપત્તિભ્યામ્ ॥ ૨.૪૭॥

તતો દ્વન્દ્વાનભિઘાતઃ ॥ ૨.૪૮॥

તસ્મિન્સતિ શ્વાસપ્રશ્વાસયોર્ગતિવિચ્છેદઃ પ્રાણાયામઃ ॥ ૨.૪૯॥

બાહ્યાભ્યન્તરસ્તમ્ભવૃત્તિર્દેશકાલસઙ્ખ્યાભિઃ
પરિદૃષ્ટો દીર્ઘસૂક્ષ્મઃ ॥ ૨.૫૦॥

બાહ્યાભ્યન્તરવિષયાક્ષેપી ચતુર્થઃ ॥ ૨.૫૧॥

તતઃ ક્ષીયતે પ્રકાશાવરણમ્ ॥ ૨.૫૨॥

ધારણાસુ ચ યોગ્યતા મનસઃ ॥ ૨.૫૩॥

સ્વવિષયાસમ્પ્રયોગે ચિત્તસ્વરૂપાનુકાર ઇવેન્દ્રિયાણાં પ્રત્યાહારઃ ॥ ૨.૫૪॥

તતઃ પરમા વશ્યતેન્દ્રિયાણામ્ ॥ ૨.૫૫॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે દ્વિતીયઃ સાધન-પાદઃ ॥

## ॥ તૃતીયોઽધ્યાયઃ ॥ ॥ વિભૂતિ-પાદઃ ॥

દેશબન્ધશ્ચિત્તસ્ય ધારણા ॥ ૩.૧॥

તત્ર પ્રત્યયૈકતાનતા ધ્યાનમ્ ॥ ૩.૨॥

તદેવાર્થમાત્રનિર્ભાસં સ્વરૂપશૂન્યમિવ સમાધિઃ ॥ ૩.૩॥

ત્રયમેકત્ર સંયમઃ ॥ ૩.૪॥

તજ્જયાત્પ્રજ્ઞાલોકઃ ॥ ૩.૫॥

તસ્ય ભૂમિષુ વિનિયોગઃ ॥ ૩.૬॥

ત્રયમન્તરઙ્ગં પૂર્વેભ્યઃ ॥ ૩.૭॥

તદપિ બહિરઙ્ગં નિર્બીજસ્ય ॥ ૩.૮॥

વ્યુત્થાનનિરોધસંસ્કારયોરભિભવપ્રાદુર્ભાવૌ
નિરોધક્ષણચિત્તાન્વયો નિરોધપરિણામઃ ॥ ૩.૯॥

તસ્ય પ્રશાન્તવાહિતા સંસ્કારાત્ ॥ ૩.૧૦॥

સર્વાર્થતૈકાગ્રતયોઃ ક્ષયોદયૌ ચિત્તસ્ય સમાધિપરિણામઃ ॥ ૩.૧૧॥

તતઃ પુનઃ શાન્તોદિતૌ તુલ્યપ્રત્યયૌ ચિત્તસ્યૈકાગ્રતાપરિણામઃ ॥ ૩.૧૨॥

એતેન ભૂતેન્દ્રિયેષુ ધર્મલક્ષણાવસ્થાપરિણામા વ્યાખ્યાતાઃ ॥ ૩.૧૩॥

શાન્તોદિતાવ્યપદેશ્યધર્માનુપાતી ધર્મી ॥ ૩.૧૪॥

ક્રમાન્યત્વં પરિણામાન્યત્વે હેતુઃ ॥ ૩.૧૫॥

પરિણામત્રયસંયમાદ્ અતીતાનાગતજ્ઞાનમ્ ॥ ૩.૧૬॥

શબ્દાર્થપ્રત્યયાનામિતરેતરાધ્યાસાત્
સઙ્કરસ્તત્પ્રવિભાગસંયમાત્સર્વભૂતરુતજ્ઞાનમ્ ॥ ૩.૧૭॥

સંસ્કારસાક્ષાત્કરણાત્પૂર્વજાતિજ્ઞાનમ્ ॥ ૩.૧૮॥

પ્રત્યયસ્ય પરચિત્તજ્ઞાનમ્ ॥ ૩.૧૯॥

ન ચ તત્સાલમ્બનં તસ્યાવિષયીભૂતત્વાત્ ॥ ૩.૨૦॥

કાયરૂપસંયમાત્તદ્ગ્રાહ્યશક્તિસ્તમ્ભે
ચક્ષુઃપ્રકાશાસમ્પ્રયોગેઽન્તર્ધાનમ્ ॥ ૩.૨૧॥

સોપક્રમં નિરુપક્રમં ચ કર્મ
તત્સંયમાદપરાન્તજ્ઞાનમરિષ્ટેભ્યો વા ॥ ૩.૨૨॥

મૈત્ર્યાદિષુ બલાનિ ॥ ૩.૨૩॥

બલેષુ હસ્તિબલાદીનિ ॥ ૩.૨૪॥

પ્રવૃત્ત્યાલોકન્યાસાત્સૂક્ષ્મવ્યવહિતવિપ્રકૃષ્ટજ્ઞાનમ્ ॥ ૩.૨૫॥

ભુવનજ્ઞાનં સૂર્યે સંયમાત્ ॥ ૩.૨૬॥

ચન્દ્રે તારાવ્યૂહજ્ઞાનમ્ ॥ ૩.૨૭॥

ધ્રુવે તદ્ગતિજ્ઞાનમ્ ॥ ૩.૨૮॥

નાભિચક્રે કાયવ્યૂહજ્ઞાનમ્ ॥ ૩.૨૯॥

કણ્ઠકૂપે ક્ષુત્પિપાસાનિવૃત્તિઃ ॥ ૩.૩૦॥

કૂર્મનાડ્યાં સ્થૈર્યમ્ ॥ ૩.૩૧॥

મૂર્ધજ્યોતિષિ સિદ્ધદર્શનમ્ ॥ ૩.૩૨॥

પ્રાતિભાદ્વા સર્વમ્ ॥ ૩.૩૩॥

હૃદયે ચિત્તસંવિત્ ॥ ૩.૩૪॥

સત્ત્વપુરુષયોરત્યન્તાસઙ્કીર્ણયોઃ પ્રત્યયાવિશેષો ભોગઃ
પરાર્થત્વાત્સ્વાર્થસંયમાત્પુરુષજ્ઞાનમ્ ॥ ૩.૩૫॥

તતઃ પ્રાતિભશ્રાવણવેદનાદર્શાસ્વાદવાર્તા જાયન્તે ॥ ૩.૩૬॥

તે સમાધાવુપસર્ગા વ્યુત્થાને સિદ્ધયઃ ॥ ૩.૩૭॥

બન્ધકારણશૈથિલ્યાત્પ્રચારસંવેદનાચ્ચ
ચિત્તસ્ય પરશરીરાવેશઃ ॥ ૩.૩૮॥

ઉદાનજયાજ્જલપઙ્કકણ્ટકાદિષ્વસઙ્ગ ઉત્ક્રાન્તિશ્ચ ॥ ૩.૩૯॥

સમાનજયાજ્જ્વલનમ્ ॥ ૩.૪૦॥ (સમાનજયાત્પ્રજ્વલનમ્)

શ્રોત્રાકાશયોઃ સમ્બન્ધસંયમાદ્દિવ્યં શ્રોત્રમ્ ॥ ૩.૪૧॥

કાયાકાશયોઃ સમ્બન્ધસંયમાલ્લઘુતૂલ-
સમાપત્તેશ્ચાકાશગમનમ્ ॥ ૩.૪૨॥

બહિરકલ્પિતા વૃત્તિર્મહાવિદેહા તતઃ પ્રકાશાવરણક્ષયઃ ॥ ૩.૪૩॥

સ્થૂલસ્વરૂપસૂક્ષ્માન્વયાર્થવત્ત્વસંયમાદ્ભૂતજયઃ ॥ ૩.૪૪॥

તતોઽણિમાદિપ્રાદુર્ભાવઃ કાયસમ્પત્તદ્ધર્માનભિઘાતશ્ચ ॥ ૩.૪૫॥

રૂપલાવણ્યબલવજ્રસંહનનત્વાનિ કાયસમ્પત્ ॥ ૩.૪૬॥

ગ્રહણસ્વરૂપાસ્મિતાન્વયાર્થવત્ત્વસંયમાદિન્દ્રિયજયઃ ॥ ૩.૪૭॥

તતો મનોજવિત્વં વિકરણભાવઃ પ્રધાનજયશ્ચ ॥ ૩.૪૮॥

સત્ત્વપુરુષાન્યતાખ્યાતિમાત્રસ્ય સર્વભાવાધિષ્ઠાતૃત્વં
સર્વજ્ઞાતૃત્વં ચ ॥ ૩.૪૯॥

તદ્વૈરાગ્યાદપિ દોષબીજક્ષયે કૈવલ્યમ્ ॥ ૩.૫૦॥

સ્થાન્યુપનિમન્ત્રણે સઙ્ગસ્મયાકરણં પુનરનિષ્ટપ્રસઙ્ગાત્ ॥ ૩.૫૧॥

ક્ષણતત્ક્રમયોઃ સંયમાદ્વિવેકજં જ્ઞાનમ્ ॥ ૩.૫૨॥

જાતિલક્ષણદેશૈરન્યતાનવચ્છેદાત્ તુલ્યયોસ્તતઃ પ્રતિપત્તિઃ ॥ ૩.૫૩॥

તારકં સર્વવિષયં સર્વથાવિષયમક્રમઞ્ચેતિ વિવેકજં જ્ઞાનમ્ ॥ ૩.૫૪॥

સત્ત્વપુરુષયોઃ શુદ્ધિસામ્યે કૈવલ્યમિતિ ॥ ૩.૫૫॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે તૃતીયો વિભૂતિ-પાદઃ ॥

## ॥ ચતુર્થોઽધ્યાયઃ ॥ ॥ કૈવલ્ય-પાદઃ ॥

જન્મૌષધિમન્ત્રતપઃસમાધિજાઃ સિદ્ધયઃ ॥ ૪.૧॥

જાત્યન્તરપરિણામઃ પ્રકૃત્યાપૂરાત્ ॥ ૪.૨॥

નિમિત્તમપ્રયોજકં પ્રકૃતીનાં વરણભેદસ્તુ

તતઃ ક્ષેત્રિકવત્ ॥ ૪.૩॥

નિર્માણચિત્તાન્યસ્મિતામાત્રાત્ ॥ ૪.૪॥

પ્રવૃત્તિભેદે પ્રયોજકં ચિત્તમેકમનેકેષામ્ ॥ ૪.૫॥

તત્ર ધ્યાનજમનાશયમ્ ॥ ૪.૬॥

કર્માશુક્લાકૃષ્ણં યોગિનસ્ત્રિવિધમિતરેષામ્ ॥ ૪.૭॥

તતસ્તદ્વિપાકાનુગુણાનામેવાભિવ્યક્તિર્વાસનાનામ્ ॥ ૪.૮॥

જાતિદેશકાલવ્યવહિતાનામપ્યાનન્તર્યં
સ્મૃતિસંસ્કારયોરેકરૂપત્વાત્ ॥ ૪.૯॥

તાસામનાદિત્વં ચાશિષો નિત્યત્વાત્ ॥ ૪.૧૦॥

હેતુફલાશ્રયાલમ્બનૈઃ સઙ્ગૃહીતત્વાદેષામભાવે તદભાવઃ ॥ ૪.૧૧॥

અતીતાનાગતં સ્વરૂપતોઽસ્ત્યધ્વભેદાદ્ધર્માણામ્ ॥ ૪.૧૨॥

તે વ્યક્તસૂક્ષ્મા ગુણાત્માનઃ ॥ ૪.૧૩॥

પરિણામૈકત્વાદ્વસ્તુતત્ત્વમ્ ॥ ૪.૧૪॥

વસ્તુસામ્યે ચિત્તભેદાત્તયોર્વિભક્તઃ પન્થાઃ ॥ ૪.૧૫॥

ન ચૈકચિત્તતન્ત્રં વસ્તુ તદપ્રમાણકં તદા કિં સ્યાત્ ॥ ૪.૧૬॥

તદુપરાગાપેક્ષિત્વાચ્ચિત્તસ્ય વસ્તુ જ્ઞાતાજ્ઞાતમ્ ॥ ૪.૧૭॥

સદા જ્ઞાતાશ્ચિત્તવૃત્તયસ્તત્પ્રભોઃ પુરુષસ્યાપરિણામિત્વાત્ ॥ ૪.૧૮॥

ન તત્સ્વાભાસં દૃશ્યત્વાત્ ॥ ૪.૧૯॥

એકસમયે ચોભયાનવધારણમ્ ॥ ૪.૨૦॥

ચિત્તાન્તરદૃશ્યે બુદ્ધિબુદ્ધેરતિપ્રસઙ્ગઃ સ્મૃતિસઙ્કરશ્ચ ॥ ૪.૨૧॥

ચિતેરપ્રતિસઙ્ક્રમાયાસ્તદાકારાપત્તૌ સ્વબુદ્ધિસંવેદનમ્ ॥ ૪.૨૨॥

દ્રષ્ટૃદૃશ્યોપરક્તં ચિત્તં સર્વાર્થમ્ ॥ ૪.૨૩॥

તદસઙ્ખ્યેયવાસનાભિશ્ચિત્રમપિ પરાર્થં સંહત્યકારિત્વાત્ ॥ ૪.૨૪॥

વિશેષદર્શિન આત્મભાવભાવનાવિનિવૃત્તિઃ ॥ ૪.૨૫॥

તદા વિવેકનિમ્નં કૈવલ્યપ્રાગ્ભારં ચિત્તમ્ ॥ ૪.૨૬॥

તચ્છિદ્રેષુ પ્રત્યયાન્તરાણિ સંસ્કારેભ્યઃ ॥ ૪.૨૭॥

હાનમેષાં ક્લેશવદુક્તમ્ ॥ ૪.૨૮॥

પ્રસઙ્ખ્યાનેઽપ્યકુસીદસ્ય સર્વથા
વિવેકખ્યાતેર્ધર્મમેઘઃ સમાધિઃ ॥ ૪.૨૯॥

તતઃ ક્લેશકર્મનિવૃત્તિઃ ॥ ૪.૩૦॥

તદા સર્વાવરણમલાપેતસ્ય જ્ઞાનસ્યાનન્ત્યાજ્જ્ઞેયમલ્પમ્ ॥ ૪.૩૧॥

તતઃ કૃતાર્થાનાં પરિણામક્રમસમાપ્તિર્ગુણાનામ્ ॥ ૪.૩૨॥

ક્ષણપ્રતિયોગી પરિણામાપરાન્તનિર્ગ્રાહ્યઃ ક્રમઃ ॥ ૪.૩૩॥

પુરુષાર્થશૂન્યાનાં ગુણાનાં પ્રતિપ્રસવઃ કૈવલ્યં
સ્વરૂપપ્રતિષ્ઠા વા ચિતિશક્તિરિતિ ॥ ૪.૩૪॥

॥ ઇતિ પતઞ્જલિ-વિરચિતે યોગ-સૂત્રે ચતુર્થઃ કૈવલ્ય-પાદઃ ॥

॥ ઇતિ શ્રી પાતઞ્જલ-યોગ-સૂત્રાણિ ॥

Proofread by Sunder Hattangadi, Kirk Wortman, BS
Vedic accents by BS

*Patanjali Yogasutra with and without Vedic Accents*
pdf was typeset on July 15, 2024

Please send corrections to *sanskrit@cheerful.com*